दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः



himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-4 ■ वर्ष-3 ■ अङ्क-94

1

27.01.2024 शुक्रवासरः वि.सं. २०८० माघकृष्ण द्वितीया माघ १३ प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com



2 गणतंत्रदिवसः २०२४ : शिमलायां राज्यपालः त्रिवर्णध्वजं उत्तोलितवान् प्रत्येकं जनपदस्य संस्कृते दर्शनम्



3 प्रतिस्पर्धायाः द्वितीये दिवसे भारतीय-फलकक्रीडकाणाम् उत्तमं प्रदर्शनम्



4 लङ्काकाण्डम्!(द्विषष्टितमः सर्गः) पुष्पकविमानेन श्रीरामचन्द्रस्य अयोध्यायात्रा,




# राष्ट्रेन हर्षोल्लासेन पञ्चसप्ततितमं गणतन्त्रदिवसः आचरितः

## राष्ट्रपतिः द्रौपदीमुर्मुः नवदिल्ल्याः कर्त्तव्यपथे सकलराष्ट्रस्य नेतृत्वं कृतवती




**हिमसंस्कृतवार्ताः, संकलनम् नरेशमलोटिया।** राष्ट्रेन पञ्चसप्ततितमं गणतन्त्रदिवसः आचरितः। राष्ट्रपतिः द्रौपदीमुर्मुः नवदिल्ल्याः कर्त्तव्यपथे आयोजिते गणतन्त्रदिवसस्य कार्यक्रमे सकलराष्ट्रस्य नेतृत्वं कृतवती। अस्मिन् वर्षे गणतन्त्रदिवस-समारोहेस्य मुख्यातिथिः फ्रांसदेशीयः राष्ट्रपतिः एमैनुअल मैक्रों इत्येषः आसीत्। भारतस्य समृद्ध-सांस्कृतिक-वैविध्यतायाः ऐक्यभावस्य प्रगतेः सैन्यशक्तेः नारीशक्तेश्च भावयुतः गणतन्त्रदिवससमारोहः अयम्। प्रधानमन्त्रिणा नरेन्द्रमोदिना राष्ट्रिय-युद्ध-स्मारक-स्थले वीरभ्यः पुष्पाञ्जलि समर्पणस्य अनन्तरम् समारोहः समारब्धः। एतदनन्तरं प्रधानमन्त्रिणा सह अन्ये विशिष्टतिथियः कर्तव्यपथं सम्प्राप्तवन्तः। राष्ट्रपतिः द्रौपदीमुर्मूः मुख्यातिथिना फ्रांसदेशस्य राष्ट्रपतिना इमैनुएल मैक्रों इत्यनेन सह पारम्परिकयानेन कर्तव्यपथं प्राप्तवती । राष्ट्रपतिभवनतः यानेन आगमनस्य एषा परम्परा चत्वारिंशत् वर्षानन्तरं पुनः आरब्धा जाता। अस्मिन् वर्षे विकसित-भारतस्य भारत-लोकतन्त्र की मातृका इत्यस्य शीर्षके आधरिते एतस्मिन् गणतन्त्रदिवससमारोहे भूयोऽपि त्रयोदश-सहस्रं विशिष्टातिथयः आगतवन्तः। अनेन उपक्रमेण समाजस्य सर्वेषां वर्गाणां जनेभ्यः गणतन्त्रदिवससमारोहे भागं ग्रहीतुं अवसरः मिलितः।

## नारीशक्तेः प्रतिनिधित्वम् :

### तिसृणां सेनानां महिला-कर्मिणां समूहेन कृतम् पथसञ्चलनम्



नारीशक्तेः प्रतिनिधित्वं तिसृणां सेनानां महिला-कर्मिणां समूहेन पदसञ्चलनेन कृतम्।

गणतन्त्रदिवस- पदसञ्चलने अस्मिन् वर्षे प्रथमवारं आवाहन इत्यस्य समूहस्य महिला-वाद्य-कलाकाराणां शङ्खध्वनिना नादस्वरेण वाद्ययन्त्रैश्च पदसञ्चलनं समारब्धम्। कर्तव्यपथे सञ्जाते पदसञ्चलने त्रयाणां सैन्यबलानां महिला-कर्मिणां समूहेन सहभागिता कृता। केन्द्रीय-सशक्त-आरक्षि-बलस्य समूहेष्वपि केवलं महिलाकर्मिणः एव आसन्। कर्तव्यपथि फ्रांसदेशस्य सशस्त्र बलानाम् संयुक्त-वाद्य-समूहैः पदसञ्चलन-समूहेनापि अभिमुख-प्रयाण-सञ्चलन कृतम्। एतदतिरिच्य भारतीय-टैंक-टी-९0 भीष्मः नाग-गोलिका-प्रक्षेपास्त्र- प्रणाली स्थल-सेनायाः युद्ध-वाहनानि रडाराप्रणाली स्वातिः इत्यादयः मुख्याकर्षत्वेन आसन्। षोडश राज्याणां केन्द्रशासित- प्रदेशानाञ्च प्रदर्शनीनां माध्यमेन कर्तव्यपथे भारतस्य समृद्ध-सांस्कृतिक-वैविध्यता रचनात्मकता च प्रदर्शिता। पद-सञ्चलनस्य सर्वाधिका बहुप्रतीक्षिता प्रस्तुतिः विमान-प्रदर्शनी आसीत्। चतुः पञ्चाशत् विमानैः उदग्र विमानानि च अद्वितीया वायु-प्रदर्शनी कृता। एतेषु विमानेषु त्रीणि विमानानि फ्रांसदेशस्य वायुसेनायाः षड्चत्वारिंशत्-विमानानि भारतीय-वायु-सेनायाः एक भारतीय- नौसेनायाः चत्वारि उदग्रविमानानि च भारतीय-स्थल-सेनायाः चासीत्।

## विश्वनेतृभिः भारतदेशाय गणतन्त्रदिवसस्य शुभकामनाः प्रदत्ताः

विश्वनेतृभिः भारतदेशाय गणतन्त्रदिवसस्य शुभकामनाः प्रदत्ताः। अमेरीकीदेशीयः विदेशमन्त्री एण्टनीब्लिंकन इत्येषः राष्ट्राय पञ्चसप्ततितमस्य गणतन्त्रदिवसस्य शुभावसरे स्वीय-शुभकामनाः प्रदत्तवान्। एकस्मिन् विज्ञप्तौ श्री-ब्लिंकनः कथितवान् यत् भारतस्य संविधानं विश्वस्य बृहत्तमाय लोकतन्त्राय स्थायि-सरञ्चनां वैश्विक नेतृत्वाय च आधारं प्रददाति। ऑस्ट्रलियादेशस्य प्रधानमन्त्री एन्थनी-अल्बनीज इत्येषः भारताय स्वीय-शुभकामनाः प्रदत्तवान्। भारते रूसदेशस्य राजदूतेन डेनिस-अलीपोव इत्यनेन गणतन्त्रदिवसावसरे शुभकामनाः प्रदत्ताः।

## भारतीयदूतावासेषु गणतन्त्रदिवसः आमानितः

विदेशस्थितेषु भारतीयदूतावासेषु गणतन्त्रदिवसः आमानितः। श्रीलंकायाः कोलम्बोनगरे भारतीय उच्चायोगेन स्वीय- राजनयिक- कार्यालयेषु गणतन्त्रदिवसः समाचरितः। भारतस्य उच्चायुक्तः सन्तोषझाः अद्य कोलम्बो नगरस्य भारत-भवने राष्ट्रिध्वजं उत्तोलितवान्। बांग्लोदशेऽपि अयं समारोहः हर्षोल्लासेन परिपालितः।

## राज्येषु केन्द्रशासितप्रदेशेषु हर्षोल्लासेन आचरितः गणतन्त्रदिवससमारोहः

राज्येषु केन्द्रशासितप्रदेशेष्वपि पञ्चसप्ततितमः गणतन्त्रदिवससमारोहः परम्परया उत्साहेन हर्षोल्लासेन च सह मान्यते। अरूणाचलप्रदेशे मुख्य समारोहः राजधान्यां इटानगरे समायोजितः। राज्यपालेन लेफ्टिनेन्ट जनरल-के.टी. पारनाईकन राष्ट्रिय-ध्वजः उत्तोलितः। एतदनन्तरं सांस्कृति-कार्यक्रमाः अपि समायोजिताः। नागालैण्डराज्ये सचिवालये गणतन्त्र-दिवस हर्षोल्लासेन समाचरितः। सचिवालये राज्य-स्तरीयाः कार्यक्रमाः समायोजिताः यत्र राज्यपालेन ला-गणेशन-इत्यनेन त्रिवर्णध्वजः उत्तोलितः। सहैव षोडश-समूहैः पदसञ्चलनस्य सम्मानः स्वीकृतः। राज्यपालेन स्वीयोद्बोधने निगदितं यत् तस्य प्रशासनं नागालैण्ड-राज्यस्य राजनीति-विषयाणां त्वरित-समाधानाय प्रतिबद्धमस्ति। उत्तरप्रदेशराज्ये सर्वेषु जनपद-मुख्यालयेषु शैक्षणिक-संस्थानेषु सर्वकारीय- कार्यालयेषु च गणतन्त्रदिवसः आमानितः। समारोहे मुख्यमन्त्री योगी आदित्यनाथः लखनऊ-नगरे स्थिते स्वीये आवासे त्रिवर्ण-ध्वजं उत्तोलितवान् ओडिशायाः भुवनेश्वर नगरे महात्मा गान्धि-मार्गे अद्य प्रातः राज्यपालेन रघुबरदासेन राष्ट्रियध्वजः उत्तोलितः। तेन सह मुख्यमन्त्री नवीन पटनायकः अन्ये च वरिष्ठ अधिकारिणः आसन्। राज्यपालाय ओडिशा-आरक्षि-बलेन अन्यै-बलैः गॉर्ड ऑफ ऑनर इति सम्मानः प्रदत्तः। राज्ये सर्वेषु जनपद मुख्यालयेषु कार्यालयेषु व्यावसायिक-संघटनेषु च गणतन्त्रदिवसः आमानितः

## प्रासङ्गिकवार्ताः

# राममन्दिरम्-

### सम्मर्दं दृष्ट्वा न्यासेन समयः परिवर्तितः, अधुना भक्ताः अस्मिन् समये रामलल्लायाः दर्शनं कर्तुं शक्नुवन्ति



22 जनवरी दिनाङ्के राममन्दिरस्य उद्घाटनात् आरभ्य भगवतः दर्शनार्थम् आगच्छन्तानाम् भक्तानां संख्या न न्यूनीभवति। गतदिनेऽपि मन्दिरात् बहिः भक्तानां बहूनां संख्या दृष्टा । भक्तानां विशालां संख्यां दृष्ट्वा श्रीरामजन्मभूमितीर्थन्यासेन भगवतः रामस्य दर्शनारार्तिक्ये परिवर्तनं कृतम्, येन अधिकाधिकेभ्यः भक्तेभ्यः दर्शनं भवेत्। विश्वहिन्दूपरिषदः मीडिया प्रभारिणा कथितं यत् रामलल्लायाः मंगला आरार्तिक्यं प्रातः सार्धचतुर्वादने, श्रृंगारार्तिक्यं (उत्थान आरती) प्रातः ६.३० वादने भविष्यति। तदनन्तरं प्रातः सप्तवादनात् भक्तानां दर्शनं आरभ्यते। सः अवदत् यत् मध्याह्न १२ वादने भोगारार्तिक्यं, सायं ७:३० वादने सायं आरती, ९ वादने रात्रौ भोगस्य आयोजनं भविष्यति। भगवतः शयनारातिक्यं रात्रौ दशवादने भविष्यति। न्यासः निरन्तरं परिवर्तनं कुर्वन् ईश्वरस्य दर्शनं जनानां कृते सुलभं करोति। अस्मात् पूर्वं मन्दिरे प्रवेशद्वाराणाम् संख्या द्वितः षट् यावत् वर्धिता आसीत् ।

## सुभाषितम्

**चिन्तनीया हि विपदां**
**आदावेव प्रतिक्रिया।**
**न कूपखननं युक्तं**
**प्रदीप्त वान्हिना गृहे॥**

भावार्थ- जिस प्रकार से घर में आग लग जाने पर कुँआ खोदना आरम्भ करना युक्तिपूर्ण (सही) कार्य नहीं है उसी प्रकार से विपत्ति के आ जाने पर चिन्तित होना भी उपयुक्त कार्य नहीं है। (किसी भी प्रकार की विपत्ति से निबटने के लिए सदैव तत्पर रहना चाहिए।)

*प्रतीकसाठ्ये मुम्बई*

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**


कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## आस्था-एक्स्प्रेस-रेलयानं एकसप्ताहं यावत् स्थगितम्
## अयोध्यायां भक्तानां जनसमूहं दृष्ट्वा रेलविभागस्य निर्णयः

**हिमसंस्कृतवार्ता- कार्यालयीयः प्रतिनिधिः।**
२९ जनवरी दिनाङ्के हिमाचलप्रदेशात् अयोध्यां प्रति रामभक्तानाम् आस्था-एक्स्प्रेसरेलयानं एकसप्ताहं यावत् स्थगितम्। इयं सूचना श्रीराममंदिरदर्शनयोजनायाः संयोजकः संजीवकटवालः अददत्। अयोध्याधामे रामभक्तानां विशालः जनसमूहः समागतः इति सः अवदत्। एतादृशी परिस्थितौ रेलविभागेन सम्प्रति भक्तानां सुविधायै आस्था-एक्स्प्रेस-रेलयानं एकसप्ताहं यावत् स्थगितम्। २९ जनवरी दिनाङ्के अयोध्यानगरं गच्छत् आस्था एक्स्प्रेस् रेलयानं अधुना फेब्रुवरीमासे प्रचलति। अस्य कृते नूतना तिथिः रेलविभागेन निर्गता भविष्यति। सः अवदत् यत् एतद् सम्पूर्ण रेलयानं रामभक्तानां कृते आरक्षितम् अस्ति। सर्वेषां पञ्जीकरणं कृतम्। एतादृशे सति रामभक्ताः स्थगितस्य रेलयानस्य कारणेन किञ्चित् विलम्बं प्राप्नुयुः, परन्तु एतद् रेलयानं केवलं तेषां सुविधायै स्थगितम् अस्ति, येन तेभ्यः रामलल्लायाः दर्शनं भवितुं किमपि समस्या न भवेत्। संजीवकटवालः अवदत् यत् रेलविभागेन अस्य रेलयानस्य नूतना तिथिः दत्ता एव तत्क्षणमेव भक्तानां सूचना भविष्यति।

## गणतंत्रदिवसः २०२४ : शिमलायां राज्यपालः
## त्रिवर्णध्वजं उत्तोलितवान् प्रत्येकं जनपदस्य संस्कृतेः दर्शनम्



**हिमसंस्कृतवार्ता- शिमला।** शुक्रवासरे सम्पूर्णे हिमाचलप्रदेशे ७५तमः गणतन्त्रदिवसः आनन्देन उत्साहेन च आचरितः। राज्यपालः शिवप्रतापशुक्लः राजधानीशिमलानगरस्य ऐतिहासिके रिजस्थले आयोजिते राज्यस्तरीयकार्यक्रमे राष्ट्रध्वजं उत्तोलनं कृतवान् ततः पथसंचलनस्य (परेडस्य) निरीक्षणं कृत्वा २२-जम्मू-कश्मीरराइफलस्य परेडसेनापतिलेफ्टिनेंट करणगोगना इत्यस्य नेतृत्वे आकर्षकमार्चपास्ट इति स्वीकृतवान् । अस्मिन्नवसरे मुख्यमंत्री सुखविन्दरसिंहसुक्खुः, विपक्षनेता जयरामठाकुरः एवं अन्ये मान्यो मान्याः उपस्थिता आसन् ।मार्चपास्ट इत्यस्मिन् सेना, भारत-तिब्बत-सीमापुलिस, हिमाचलप्रदेश सशस्त्रपुलिसबलं, हरियाणापुलिसः, राज्यपुलिसः, गृहरक्षकः, अग्निशामकसेवा तथा हिमाचलप्रदेशडाकसेवा, आपदा- प्रबन्धनं, पूर्वसैनिकाः, राष्ट्रियकैडेट कोर (एनसीसी), राष्ट्रीयसेवायोजना, भारतस्काउट एवं गाइड्स इत्येतेषां दलैः भागं स्वीकृतम्। राज्यपालः डिजिटल-प्रौद्योगिकी-शासन-विभागेन आयोजितायाः एचपी-डिजिटल-इग्निशन-प्रतियोगितायाः विजेतृभ्यः अपि पुरस्कारं प्रदत्तवान् । अस्मिन् अवसरे विभिन्नविभागानाम् विकासात्मकक्रियाकलापानाम् आकर्षकचित्रं अपि प्रस्तुतम् ।समारोहे १६ चित्राणि अपि बहिः आनीतानि आसन् । उद्यानविभागस्य तालिकायां प्रथमपुरस्काररूपेण १०,००० रुप्यकाणि प्रदत्तानि।मुख्यमन्त्रिणः सन्निध्ये राज्यपालेन आयुषमानभारतप्रधानमन्त्री जन आरोग्ययोजनायाः अन्तर्गतं सर्वोत्तमप्रदर्शनं कुर्वतां स्वास्थ्यसंस्थानेभ्यः प्रशंसापत्रं प्रदत्तम्।जनपदः शिमला, सिरमौर, राजकीय-वरिष्ठ-माध्यमिक-विद्यालयः रोहड़ू, बाल-आश्रम टुटीकण्डी इत्यस्य अतिरिक्तं हरियाणा-प्रदेशस्य उत्तरक्षेत्रसांस्कृतिककेन्द्र द्वारा आकर्षकाः सांस्कृतिकाः कार्यक्रमाः प्रस्तुताः। पुलिस-समूहस्य मनमोहक-प्रस्तुतिः अपि आकर्षणस्य केन्द्रम् आसीत् । इन्दिरागांधी-आयुर्विज्ञानमहाविद्यालयः शिमला, डॉ. राजेन्द्रप्रसादराजकीय-चिकित्सामहाविद्यालयः, टांडा एवं पंडितजवाहरलालनेहरूः चिकित्सामहाविद्यालयः चम्बा इत्येतेभ्यः राज्यस्तरीयपुरस्काराः प्रददन् । अस्मिन्नवसरे राज्यपालः मुख्यमन्त्री च पुत्रीं रक्षय पुत्रीं पाठय अर्थात्'बेटी बचाओ-बेटी पढाओ' इति सन्देशं दत्त्वा वातगोलाः अपि मुक्तवन्तः।इन्दिरागांधी-आयुर्विज्ञानमहाविद्यालयस्य (IGMC) वरिष्ठचिकित्साधीक्षकः सम्मानितः।हिमसंस्कृतवार्ता-शिमला। आयुष्मान-भारत-प्रधानमन्त्री-जन-आरोग्य-योजनायाः अन्तर्गतं राज्ये उत्तमाः स्वास्थ्यसुविधाः प्रदातुं राज्यपालः शिवप्रतापशुक्लः शुक्रवासरे ऐतिहासिके रिजस्थले आयोजिते को गणतंत्रदिवसस्य समारोहे इन्दिरागांधी-आयुर्विज्ञानमहाविद्यालयस्य (IGMC) वरिष्ठचिकित्साधीक्षकं डॉ. राहुल राव प्रशंसापत्रेण पुरस्कृतवान् ।

## सोलनस्य भगिनी-भ्रातरौ ऑस्ट्रेलियादेशे मृतौ
# समुद्रे मज्जनेन अभवत् मृत्युः

**हिमसंस्कृतवार्ता- कार्यालयीयः प्रतिनिधिः।**
आस्ट्रेलियादेशे मज्जनेन सोलनस्य भ्राता भगिनी च मृतौ। वार्ता प्राप्य मात्रेण नगरे शोकः अभवत्। बुधवासरे सोलननिवासी बिट्टू आनन्दस्य पुत्रः जगजीतः (शिवम्) पुत्री च सुहानी च स्वमातृस्वस्रा सह आस्ट्रेलियादेशस्य विक्टोरियायाः फिलिप द्वीपे अवकाशं यापयितुं गतवन्तौ आस्ताम्। प्राप्तसूचनानुसारं केचन जनाः फिलिप्द्वीपे स्नानार्थं समुद्रे गतवन्तः, परन्तु समुद्रस्य प्रबलतरङ्गयोः निरुद्धाः मृताः च। तत्र उपस्थिताः जीवनरक्षकाः तान् उद्धारयितुं प्रयतन्ते स्म, परन्तु समुद्रात् बहिः आकृष्यमाणाः यावत् समुद्रस्य विशालतरङ्गैः त्रयः जनाः प्राणान् त्यक्तवन्तः आसन् एकां बालिकां उद्धारयित्वा चिकित्सालयं नीता, परन्तु बालिका चिकित्सालये एव मृता। तेषु सोलननगरस्य षष्ठसङ्ख्यायाः वार्डस्य बिट्टू इत्यस्य बालकौ द्वौ वास्तविकौ भ्रातरौ भगिन्यौ च आस्ताम्।



मृतेषु रीमासोढ़ी (४३), शिवम (२३), सुहानी (२०) अपरा २० वर्षीयः बालिका च अस्ति। घटनायाः अनन्तरं गृहे वातावरणं दुःखदं जातम्। आस्ट्रेलियादेशे अध्ययनं कुर्वन्तः वार्ड-६ सदस्या रेखा साहनी अवदत् यत् बिट्टू आनन्दस्य उभयोः बालकयोः आकस्मिकं निधनस्य वार्ता प्राप्य वार्डसहितं नगरे शोकस्य तरङ्गः अस्ति सा ईश्वरं प्रार्थितवती यत् सः उभयोः बालकयोः आत्मानं शान्तिं प्रयच्छेत्। सा अवदत् यत् एतत् असह्यं दुःखं सोढुम् ईश्वरः कुटुम्बं बलं दद्यात्।

# हिमाचलस्य जनपदेषु सोत्साहेन मानितः गणतंत्रदिवसः

**हिमसंस्कृतवार्ता- कार्यालयीयः प्रतिनिधिः।**
७५ तमः गणतंत्रदिवसस्य समारोहः हिमाचलस्य सर्वेषु जनपदेषु सोत्साहेन मानितः। किन्नौरम् - पंचायती राजमंत्री अनिरुद्धसिंहः रिकोंगपियो इत्यत्र ध्वजोत्तोलनं कृतवान् किन्नौरजनपदस्य जिलास्तरीयः गणतंत्रदिवससमारोहः जनपदमुख्यालये रिकोंगपियो इत्यत्र मानितः। अस्मिन्नवसरे पंचायतीराज मंत्री अनिरुद्धसिंहः त्रिवर्णध्वजं उत्तोलय पथसंचलनं स्वीकृतवान्। पुलिस, आईटीबीपी, होमगार्ड, एनएसएस, एससीसी इत्यादीनां दलैः भव्यं पथसंचलनं कृतम्।

### कुल्लूः - गणतन्त्रदिने कुल्लौ भव्यं पथसंचलनम्

तत्रैव शुक्रवासरे ७५ तमे गणतन्त्रदिने मण्डलमुख्यालये कुल्लौ भव्यपथसंचलनस्य आयोजनं कृतम् । तस्मिन् पुलिस, आईटीबीपी, होमगार्ड, एनएसएस, एससीसी सहित नव दलानि भागं गृहीतवन्तः। मुख्यसंसदीयसचिवः (सीपीएस) सुन्दरठाकुरः त्रिवर्णध्वजं उत्थाप्य पथसंचलनं स्वीकृतवान्। कार्यक्रमं द्रष्टुं मण्डलस्य विभिन्नक्षेत्रेभ्यः जनानां विशालः समूहः एकत्रितः आसीत् । अस्मिन् काले आकर्षकसांस्कृतिककार्यक्रमाः अपि आकर्षणस्य केन्द्रं अभवन्।

### लाहौल-स्पीति -जगतसिंहनेगी केलांगे ध्वजोत्तोलनं कृतवान्

अपरपक्षे राजस्वमन्त्री जगतसिंहनेगी लाहौल-स्पीतिजनपदस्य केलाङ्गे कठोरशीते त्रिवर्णध्वजं उत्तोलितवान्। सः पथसंचलनं स्वीकृतवान्।

### काङ्गड़ा- धर्मशालायां आयोजितः गणतंत्र- दिवससमारोहः

धर्मशालायां जिलास्तरीये आयोजिते गणतंत्रदिवससमारोहे विधानसभाध्यक्षः कुलदीपसिंहपठानिया मुख्यातिथिरूपेण भागं स्वीकृतवान्। अस्मिन् समये सः राष्ट्रध्वजं उत्थाप्य भव्यपथसंचलनस्य अभिवादनं कृतवान् । तस्मिन् एव काले गणतन्त्रदिने गग्गलविमानस्थानके भव्यसमारोहस्य आयोजनं कृतम् । भारतीय विमानस्थानक-प्राधिकरण सिविलविमानस्थानकस्य निदेशकः धीरेन्द्रसिंहः राष्ट्रीयध्वजोत्तोलनं कृतवान् । गग्गलविमानस्थानके सुरक्षायै नियुक्तैः हिमाचलप्रदेशपुलिसकर्मचारिभिः गार्ड आफ् ऑनर प्रदत्तम्। तदनन्तरं केन्द्रीयविद्यालय भनाला (गोजु) तथा माउण्ट् कार्मेल विद्यालयः गगल इत्येतयोः छात्रैः सांस्कृतिककार्यक्रमाः प्रस्तुताः। केन्द्रीय विद्यालय भनला गोजू इत्यस्य बालकैः देशभक्तिगीतानामुपरि नृत्यं कृतम् । अपरपक्षे माउण्ट् कार्मेल् विद्यालयस्य बालकैः कृताः शैक्षिकप्रस्तुतयः सर्वान् मोहितवन्तः ।

### मण्डी- ऐतिहासिकसेरीमञ्चे ७५ तमस्य गणतन्त्रदिवसस्य उत्सवः आचरितः

मण्डीनगरस्य ऐतिहासिकसेरीमञ्चे ७५ तमस्य गणतन्त्रदिवसस्य जिलास्तरस्य उत्सवस्य आयोजनं कृतम्। यस्य अध्यक्षता उद्योगमन्त्री हर्षवर्धनचौहानः अकरोत् । सर्वप्रथमं राष्ट्रपितुः महात्मागान्धी-प्रतिमायाः मालाकरणं कृत्वा ततः राष्ट्रध्वजस्य उत्थापनेन भव्यपथसंचलनस्य अभिवादनं स्वीकृतवान् । हिमाचलपुलिसः, गृहरक्षकदलम्,पुलिसवाद्यदलं, विद्यालयस्य बालकाः च पथसंचलनं कृतवन्तः । सः स्वसम्बोधने देशस्य स्वातन्त्र्यार्थं बलिदानं कृतवन्तः हुतात्मनां स्मरणं कृत्वा श्रद्धांजलिम् अयच्छत् । हर्षवर्धनचौहानः इत्यनेन उक्तं यत् राज्यसर्वकारः राज्यं स्वनिर्भरं राज्यं कर्तुं निरन्तरं प्रयत्नाः कुर्वन् अस्ति, आगामिषु १० वर्षेषु राज्यं स्वनिर्भररूपेण उद्भवति।

### चम्बा - चम्बायां मन्त्री यादविन्दरगोमा राष्ट्रध्वजं उत्तोलितवान्

चम्बा-नगरस्य ऐतिहासिक-चौगान-स्थले जिला-स्तरीय-गणतन्त्र-दिवस-उत्सवः अतीव उत्साहेन आचरितः । समारोहस्य अध्यक्षतां आयुष-युवा-क्रीडामन्त्री यादविन्दरगोमा अकरोत् । अस्मिन् काले सः ध्वजं उत्तोलय पुलिसः, गृहरक्षकः, एनसीसी, एनएसएस इत्येतेषां दलैः प्रस्तूतस्य पथसंचलनस्य अभिवादनं गृहीतवान्।। समारोहे सदरविधायकः नीरजनैय्यरः गणमान्याः उपस्थिताः आसन् । अस्मिन्नवसरे विद्यालयस्य बालकैः विविधैः समूहैः च सांस्कृतिककार्यक्रमाः अपि प्रस्तुताः कर्मचारिणः मेधावीबालाः च उत्कृष्टकार्यस्य कृते प्रमाणपत्रैः सम्मानिताः।

### सिरमौरम्- मन्त्री धनीराम ःशाण्डिलः नाहाने गणतंत्रदिवसस्य समारोहे अध्यक्षतां कृतवान्

सिरमौर-जनपदस्य जिलास्तरीयः गणतंत्रदिवससमारोहः जनपदस्य मुख्यालये नाहने हर्षोल्लासेन अभवत्। स्वास्थ्य एवं सामाजिक न्याय तथा अधिकारिता मंत्री डॉ. कर्नलः धनीरामशाण्डिल मुख्यातिथिरूपेण भागं स्वीकृतवान्। अस्मिन् समये सः ध्वजोत्तोलनं कृत्वा भव्यपथसंचलनस्य अभिवादनं स्वीकृतवान्। अस्मिन् अवसरे सः जनान् अपि सम्बोधितवान् । स्वास्थ्यमन्त्रिणा सह हिमाचलप्रदेशविधानसभायाः उपाध्यक्षः विनयकुमारः विधायकः नाहन अजयसोलंकी च उपस्थिताः आसन्। जिलास्तरस्य समारोहस्य अवसरे नगरस्य विभिन्नैः सर्वकारीय-निजी-विद्यालयैः, संस्थाभिः च आकर्षकाः सांस्कृतिक-कार्यक्रमाः अपि प्रस्तुताः । एतस्मिन् समये मन्त्री कर्णल धनीराम शाण्डिल इत्यादयः कलाकारैः सह नृत्यं कृतवन्तः ।

### बिलासपुरम्- मन्त्री राजेशधर्माणी अकरोत् कार्यक्रमस्य अध्यक्षता

बिलासपुरजनपदस्य जिलास्तरीयः गणतंत्रदिवससमारोहः राजकीय-वरिष्ठ-माध्यमिक-विद्यालयः (छात्रः) इत्यस्य क्रीडाङ्गणे अभवत्। समारोहस्य अध्यक्षता तकनीकी शिक्षा मंत्री राजेशधर्माणी अकरोत्। अस्मिन्नवसरे सः विभिन्नदलानां पथसंचलनस्य अभिवादनं स्वीकृतवान्। विविधैः सांस्कृतिकदलैः सांस्कृतिकाः कार्यक्रमाः अपि प्रस्तुताः। अस्मिन्नवसरे मुख्यातिथिः समाजे उत्कृष्टकार्यकर्तृभ्यः पुरस्कृतवान्।

# प्रतिस्पर्धायाः द्वितीये दिवसे भारतीय-फलकक्रीडकाणाम् उत्तमं प्रदर्शनम्

## के एल राहुल- रविन्द्र जडेजा इत्यनयोः अर्धशतकीय पाली

### दिवसान्ते भारतस्य 05 क्रीडकहानौ 316 धावनांकाः





हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा, नादौनम्

भारत- इंग्लैंडदेशयोः मध्ये जायमानायाः टेस्ट क्रिकेट श्रृंखलायाः प्रथमप्रतिस्पर्धायाः प्रथमे दिने भारतीयकन्दुकक्षेपकाणां श्रेष्ठं प्रदर्शनं जातम्। टॉस विजित्य इंग्लैंडदलेन प्रथमं फलकक्रीड़ा चयनिता। प्रथमपाल्यां इंग्लैंडदलस्य पाली 246 धावनांकेषु समाप्ता। इंग्लैंडपक्षतः दलनायकः बेन स्टोक्सः सर्वाधिकं 70 धावनांकान् अर्जितवान्। कन्दुकक्षेपणे रविचंद्रन अश्विन रविन्द्र जडेजा च 3-3, जसप्रीत बुमराहः अक्षर पटेलश्च 2-2 स्तोभान् प्राप्तवन्तः। उत्तरे भारतस्य प्रथमपाल्याः आरम्भः प्रारम्भिकक्रीडकेन यशस्वी जायसवालेन विद्युत्प्रवाह एव कृतः। तेन दिवसांते अविजितः 76 (70) धावनांकाः कृता। प्रथमदिनस्य क्रीड़ायाः समाप्तौ भारतस्य पाली 119/1 इत्यत्र अस्ति। इंग्लैंडदलस्य पार्श्वे च 127 धावनांकानाम् अग्रता अस्ति।

# देशस्य सेवायै राष्ट्रियविकासाय च निरन्तरप्रयत्नाः करणीयाः- 'रमाकान्तकुकरेती'

## वयं राष्ट्रे जागृयाम जागरूकाः च भवामः- "रोशनबलूनी"




हिमसंस्कृतवार्ताः -कुलदीपमैन्दोला।कोटद्वारं।

कण्वघाट्यां राजकीयवरिष्ठमाध्यमिकविद्यालये ७५तमः गणतन्त्र-दिवसः अतीव उत्साहेन आचरितः । प्रथमं ध्वजं विद्यालयस्य प्रधानाचार्यः रमाकान्तकुकरेती सम्प्रसारितवान्। सर्वप्रथमं विद्यालयस्य प्राचार्यः शिक्षकान् छात्रान् च गणतन्त्रदिवसस्य शुभकामनाम् अयच्छत्। स्वसम्बोधने देशाय स्वप्राणार्पितवद्भ्यः बलिदानिभ्यः श्रद्धाञ्जलिम् अर्पयन् सः अवदत् यत् वयं तेषां त्यागं च बलिदानं सर्वदा स्मर्य बलिदानिनां दर्शितमार्गम् अनुसरणं कर्तुं निरन्तरं प्रयत्नं कुर्मः। अस्माभिः सर्वदा देशस्य सेवायै राष्ट्रियविकासाय च निरन्तरप्रयत्नाः करणीयाः | एतदर्थम् अस्माभिः सुशिक्षा, महापुरुषाणां कथाः च आत्मसात्करणीयाः । तदा एव वयं राष्ट्रं प्रगतेः मार्गे अग्रे नेतुं शक्नुमः। सांस्कृतिककार्यक्रमात् पूर्वं छात्रैः त्रिरङ्गसभा कृता । सभायां जयघोषम् उद्धृत्य सम्पूर्णं क्षेत्रं राष्ट्रियीकरणं जातम् । विद्यालयपरिसरतः मिलनचौकपर्यन्तं सभा गता। पुनः विद्यालयम् आगत्य तत् सम्पूर्तिरभवत्। तदनन्तरं छात्रैः सांस्कृतिककार्यक्रमः प्रदत्तः। विद्यालयस्य पक्षतः सर्वेभ्यः प्रतिभागिभ्यः पुरस्काराः अपि वितरिताः। अस्मिन् अवसरे रोशनबलूनी महोदयः अतिथिरूपेण आसीत् । श्रीबलूनीद्वारा कथितं यत् जनानाम् तन्त्रे वयं संवैधानिकाधिकारैः सह प्रतिबद्धाः भवामः मौलिकारान् वयं जानीमः तेन प्रोक्तं यत् वयं राष्ट्रे जागृयाम जागरूकाः च भवामः। कार्यक्रमस्य सञ्चालनं राकेशमोहनध्यानीद्वारा विहितः । अवसरेस्मिन् सुखदेवशाहः, उमेशचन्द्रः, मंजूनेगी, अनुराधा जोशी, महेशचन्द्रः रजवारः आदयः शिक्षकाः कर्मचारिणः आदयश्च उपस्थिताः आसन्।

# उत्तराखण्डराज्यस्य विद्यावारिधि ज्योतिप्रसादगैरोला जामिया-विश्वविद्यालये देहल्यां निजं शोधपत्रं प्रास्तौत्



हिमसंस्कृतवार्ताः। जनवरीमासे त्रयोविंशतितारिकायां चतुर्विंशत्यधिकद्विसहस्रतमे ख्रिष्टाब्दे जामिया-मिल्लिया-इस्लामियाविश्वविद्यालये आयोजितायां द्वि-दिवसीयराष्ट्रियसङ्गोष्ठ्यां डॉ. ज्योतिप्रसादगैरोला ( निवासी भांगलाग्रामस्य टिहरीगढ़वाल-जनपदस्य उत्तराखण्डराज्यस्य) प्राचीनभारतीयकौटिल्यकालिक-राजव्यवस्थायां स्वविचारान् प्रास्तौत्।

गैरोलामहोदयेन कौटिल्यसमयस्य राजव्यवस्थायाः उत्कृष्टतत्त्वानि (यथा राजत्वसिद्धान्तः, सप्ताङ्गावधारणा, लोककल्याणकारि राज्यम्, भ्रष्टाचारनियन्त्रणनीतिः, धर्मनीतिः, विदेशनीतिः इत्यादयः) जगतः वर्तमानसमस्यानां समाधाने प्रासङ्गिता उक्ता। अस्मिन् परिप्रेक्ष्ये प्रधानमन्त्रिणः श्रीनरेन्द्रमोदिवर्यस्य सर्वकारस्य नेतृत्वे वर्तमाने भारतसर्वकारेण सुशासनं, भ्रष्टाचारनियन्त्रणकार्यवाही , लोककल्याणकारि राज्यं, सामाजिक-धार्मिक-आर्थिक-न्यायः, विश्वपटले भारतं विश्वगुरुरूपेण प्रतिष्ठितं कर्तुं प्रयासः एवमादीनि कार्याणि प्राचीनकौटिल्यकालस्य राजव्यवस्थायाः गौरवप्रेरितानि सन्ति। आगामिसमस्यानां समाधानेऽपि कौटिल्यराजव्यवस्था प्रेरयति।

अवसरेऽस्मिन् प्रो० इकबालहुसैनः कार्यवाहकः कुलपतिः जामियामिल्लिया इस्लामिया देहली, प्रो० मुरलीमनोहरपाठकः कुलपतिः लालबहादुरशास्त्री राष्ट्रियसंस्कृतविश्वविद्यालयः देहली, प्रो० गिरीश्वरमिश्रः पूर्वकुलपतिः वर्धाविश्वविद्यालयः आदयो गणमान्याः विद्वासः उपस्थिताः अभवन्।

# बी. डी. वर्ल्ड विद्यालये ध्वजरोहणम् उत्सवस्य आयोजनम्



हिमसंस्कृतवार्ताः- कुणाल कौशिकः, मोतिहारी

बी. डी. वर्ल्ड विद्यालये सप्तवर्षेभ्यः प्रतिवर्षे गणतन्त्रदिवसस्य उत्सवस्य आयोजनं कुर्वन् अस्ति। मोतिहारीनगरस्य बी. डी. वर्ल्ड विद्यालये गणतन्त्रदिवसस्य, उत्सवस्य विद्यालये परिसरे प्रतिवर्षं आचर्यते। गतवर्षानुसारं अस्मिन् वर्षे अपि विद्यालये परिसरे ध्वजरोहणं जातम्। तथैव प्रतिवर्षं बालकैः परेड, सांस्कृतिककार्यक्रमः, भाषणं, नाटकम् इत्यादयः भवन्ति। प्रतिवर्षानुसारम् अस्मिन् वर्षे अपि भव्यजागरणस्य, प्रदर्शनीशोभायात्राणाञ्च आयोजनं अभवत्। ध्वजारोहणकार्यक्रमस्य उद्घाटनं विद्यालयस्य निर्देशकस्य विकास जायसवालस्य निर्देशिकायाः जगदम्बा जयसवालस्य हस्तयोः अकरोत्। कार्यक्रमस्य सञ्चालनं संस्कृतशिक्षकः चिकित्सकप्रतिनिधिः संस्कृतपत्रकारः कुणाल कौशिकः, ई. अमन कुमारः, प्रकाश अस्थानाः, देवेन्द्र कुमारः, सागर पाठकः, दिलीप कुमारः, दिव्य प्रकाश कुमारः, आशीष कुमारः, शिवम कुमारः, सुन्दरम शुक्लाः, सिमा सिंह, गीता श्रीवास्तव, पूजा गुप्ता, विपुल कुमारी, पीहू गिरी, डिम्पी, प्रिया जयसवाल, अर्चना, ममता, वर्षा, अनुष्का, हस्बुन निशा, इत्यादयः अन्ये सदस्याः जनाः च उपस्थिताः आसन्। अवदत्, "एते दिवसाः अस्माकं कृते ऐतिहासिकः दिनानि सन्ति। ध्वजारोहणे सांस्कृतिककार्यक्रमे च बहवः जनाः सदस्याः च सम्मिलिताः आसन्। सांस्कृतिककार्यक्रमे बालकाः अतीवसुन्दरं भागं गृहीतवन्तः, सांस्कृतिककार्यक्रमस्य च उत्तमं प्रदर्शनं कृतवन्तः। कार्यक्रमे निर्देशकः विकास जायसवालः, निर्देशिका जगदम्बा जायसवाल च बालकानां कृते उपहारः अपि दत्तवन्तः।


# बिहारः पुनः निराशः, ९ वर्षपर्यन्तम् अपि गणतंत्रदिवसस्य परेडकार्यक्रमे न दृष्टः

हिमसंस्कृतवार्ताः- कुणाल कौशिकः, मोतिहारी

पुनः एकवारं गणतंत्रदिवसस्य परेड-मध्ये बिहारस्य प्रदर्शनशोभायात्रा न दृष्टा। दिल्ली-नगरस्य कर्त्तव्यपथि बिहारस्य प्रदर्शनशोभायात्रा न दृष्टा। यदा एतत् क्रमशः ९ वर्षम् अस्ति। अस्मिन् वर्षे दिल्लीनगरे गणतन्त्रदिवसस्य अवसरे कर्त्तव्यपथि बिहारस्य गंगाजलयोजनां दर्शयितुं प्रयत्नः कृतः। बिहारस्य राजगीर, गया, बोधगया, नवादा जनानां कृते गंगाजलस्य आपूर्तिं कर्तुं पटनानगरस्य मोकामातः वेणुंजलस्य आपूर्तिः क्रियते। जलसंरक्षणं प्रबन्धनं च सुदृढं कर्तुं राष्ट्रियस्तरस्य प्रदर्शनं च कर्तुं बिहारः गणतंत्रदिवसे झांकी समावेष्टुं प्रस्तावः कृतः आसीत्। परन्तु बिहारस्य प्रस्तावः नअङ्गीकृतः।

## ।। श्रीरामायणकथा ।।

### लङ्काकाण्डम्!(द्विषष्टितमः सर्गः) पुष्पकविमानेन श्रीरामचन्द्रस्य अयोध्यायात्रा, भरद्वाजगुहादिभिः सह च साक्षात्कारः। (चतुर्थः खण्डः)







हिमसंस्कृतवार्ता, प्रदीपः
pradipnath997@gmail.com

हे वैदेहि! अत्र महर्षेः शरभङ्गस्य महान् आश्रमः दृश्यते। अत्रैव देवराजः इन्द्रः आगच्छत्। अत्र महर्षेः अत्रेः तापसाश्रमाः दृश्यन्ते। हे देवि! अत्र तपस्विनी धर्मचारिणी त्वया दृष्टा। अस्मिन् स्थले हि महाकायः विराधः मया हतः अभवत्। देवि! अत्र शैलेन्द्रचित्रकूटः दृश्यते। अत्रैव मां प्रसादयितुं कैकेयीपुत्रः भरतः आगतः आसीत्। एषा च सा चित्रकानना यमुना दूरात् दृश्यते। हे मैथिलि! एषः भरद्वाजाश्रमः दृश्यते। इयं त्रिपथगामिनी पुण्या गङ्गा दृश्यते। एतत् च शृङ्गवेरपुरं यत्र मम सखा गुहः निवसति। एषा तु मम पितुः राजधानी अयोध्या दृश्यते। हे मैथिलि! त्वया पुनरागता, प्रणामं कुरु। ततः हृष्टाः वानराः सविभीषणाः राक्षसाः च सर्वे तां पुरीं दूरात् पश्यन्ति स्म। एवमेव चतुर्दशे पूर्णे वर्षे लक्ष्मणाग्रजः रामः भरद्वाजाश्रमं प्राप्य तं मुनिम् अवन्दत। मुनिं भरद्वाजम् अभिवाद्य अपृच्छत् भगवन्! अयोध्यायां सर्वे कुशलिनः सन्ति ननु? कुत्रचित् दुर्भिक्षं तु न जातम्? भरतः धर्मानुसारं राज्यं पालयति वा? मम मातरः जीवन्ति ननु? रामेण एवमुक्तः प्रहृष्टः महामुनिः भरद्वाजः स्मितपूर्वं रघुश्रेष्ठं रामं प्रत्यवदत् हे राम! राज्ये सर्वे कुशलिनः सन्ति। तव आज्ञया भरतः वल्कलं धृत्वा तव पादुके पुरस्कृत्य तव प्रतीक्षां करोति। हे राम! पितुराज्ञया यदा त्वं सर्वम् ऐश्वर्यं त्यक्त्वा वनम् अगच्छः तदा त्वां दृष्ट्वा मम अत्यन्तं दुःखम् अभवत्, किन्तु इदानीं त्वां शत्रुसूदनं समित्रगणबान्धवं दृष्ट्वा अहम् अत्यन्तं सन्तुष्टः अस्मि। हे राघव! तव सुखदुःखं सर्वं मम विदितम् अस्ति। जनस्थाने ब्राह्मणानां रक्षणार्थं त्वं बहुभिः राक्षसैः सह खरदूषणयोः वधम् अकरोः। मायामृगरूपेण तव मारीचदर्शनम्, रावणेन तव अनिन्दिता भार्या हृता। पुनः तव कबन्धदर्शनम्, पम्पाभिगमनम्, सुग्रीवेण च सह तव सख्यं यत्र त्वया बाली हतः अभवत्। पुनः वातात्मजस्य हनुमतः वैदेह्याः महत् मार्गणं कर्म। विदितायां वैदेह्यां त्वया नलसेतुः कृतः। ततः प्रहृष्टैः वानरयूथपैः लङ्का दीपिता, सपुत्रबान्धवामात्यः सबलः सवाहनः रावणः सङ्ख्ये निहतः अभवत्। तस्मिन् देवकण्टके रावणे निहते सेन्द्राः देवाः आगत्य तुभ्यं वरम् अददुः इति सर्वमपि अहं तपसा अजानाम्। हे धर्मवत्सल! मम शिष्याः प्रतिदिनम् अयोध्यां गच्छन्ति, तेभ्यः हि अहं तत्रत्यं संवादं प्राप्नोमि। हे शस्त्रभृतां वर! देवाः तुभ्यं वरम् अददुः अहमपि तुभ्यं वरं ददामि प्रतिगृहाण। अद्य अत्रैव उषित्वा श्वः अयोध्यां गच्छ। नृपात्मजः रामः मुनेः भरद्वाजस्य वाक्यं शिरसा प्रतिगृह्य संहृष्टः बाढम् इत्येवमुक्त्वा वरम् अयाचत। भगवन्! अयोध्यां प्रतिगच्छति मार्गे अकालफलिनः सर्वे वृक्षाः मधुस्रवाः भवन्तु। अमृतगन्धीनि विविधानि बहूनि फलानि च भवन्तु। श्रीरामस्य याचनं श्रुत्वा महामुनिः भरद्वाजः तथास्तु इति कथनमात्रेण तत्रत्याः सर्वे पादपाः स्वर्गपादपसन्निभाः अभवन्। निष्फलाः वृक्षाः फलिनः अभवन्, विपुष्पाः च पुष्पशालिनः अभवन्। अयोध्यां गच्छन् योजनत्रयं यावत् मार्गः मधुस्रवैः वृक्षैः पूर्णः अभवत्। ततः प्रहृष्टाः वानराः सर्वे बहूनि दिव्यानि मधुराणि फलानि अखादन्। -प्रदीपः!

## मम मातृभूमिः



""""""""""""""""""""""

(मुक्तकछन्दसि)

सरसा सुन्दरी शस्यश्यामला,
सर्वरत्नयुता मे मातृभूमिः ।।
पाठयति लोकं स्नेहाध्यायम्,
स्नेहयुता मे मातृभूमिः ।।
उन्नतनगा समतला च कुत्र
विविधरूपयुता मे मातृभूमिः । ।
मान्यते यया विश्वम्परिवारः,
वात्सल्ययुता मे मातृभूमिः ।।
मन्दिरञ्च कुत्र मस्जिदः,
नानाधर्मयुता मे मातृभूमिः ।।
वेदाश्चत्वारः स्तम्भाः यस्याः
विज्ञानयुता मे मातृभूमिः ।।
वहन्ति गङ्गा-कृष्णा-कावेरी,
यत्र सा मे मातृभूमिः ।।
ऋषयः यत्र भजन्ति जगदीशं,
भक्तियुता मे मातृभूमिः ।।
मित्रदृष्टया पश्यति लोकम्
शान्तिप्रिया मे मातृभूमिः ।।

- शिवकुमारशर्मा "शिवा"*

## श्रीसूर्यवन्दना



असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

हे आदिदेव, भास्कर ! त्वां प्रणमामि, मदुपरि सदा प्रसन्नः भव, सुवरदः भव । हे दिवाकर ! तुभ्यं नमस्कारः, हे प्रभाकर ! त्वं प्रणम्यसे मया । सप्ताश्वयुतं रथमारूढवान्, हस्ते श्वेतकमलं गृहीतवान्, प्रचण्डः, तेजस्वी, कश्यपकुमारः, सूर्यः त्वमेवासि, अतः हे सूर्यभगवन् ! त्वां स्तौम्यहम् । लोहितवर्णीयः, रथारूढः, समस्तलोकानां पितामहः, महापापहारी, सूर्यदेवः चासि त्वम्, एतादृशाय तुभ्यं नमो नमः ! यः त्रिगुणमयः, ब्रह्मविष्णुमहेश्वररूपः, महापापघ्नः, महावीरः स्यात्, सः तु त्वमेव सूर्यभगवान् असि, अतः त्वां सभक्ति प्रणमाम्यहम् । यः वर्धमानः तेजःपुञ्जः, वायुगगनस्वरूपः, समस्तलोकानाम् अधिपतिः तु सः भगवान् सूर्यदेवो हि अस्ति, अर्थात् त्वमेवासि, अतस्तुभ्यं मे सहस्रवारं नमो नमः ! बन्धुकपुष्पवत् रक्तवर्णीयः, हारकुण्डलादिभिः विभूषितः, एकचक्रधारी सूर्यदेवः यः स्यात्, तं देवं प्रणमाम्यहम् । यः महातेजसः प्रदीपकः, महापापहारी, जगतः कर्ता चास्ति सः सूर्यदेवः आख्यायते, तं देवं सश्रद्धं नमस्करोमि । यः जगतः नायकः, ज्ञानविज्ञानमोक्षाणां प्रदायकः, महापापविनाशकः वर्तते, तं सूर्यदेवं कोटिशः नमाम्यहमिति, शुभम् । ओं श्रीभानवे नमः !



## नागौरः

राजस्थानराज्ये स्थितस्य नागौरमण्डलस्य केन्द्रम् अस्ति । नागौर-नगरस्य स्थापना नागवंशिभिः कृता इति तस्य नाम्ना ज्ञायते [१] । एतस्य नगरस्य स्थापना द्वितीयायाम् उत तृतीयायां शताब्द्याम् अभवत् । यतो हि कुषाण-जनानां विरुद्धं नागवंशिनः आहताः अभूवन् । ततः वाकाटक-वंशीयाः, गुप्तवंशीयाः च सम्राजः तेषाम् उन्मूलनम् अकुर्वन् । अहिच्छत्रपुरं, नागपुरं, नागपट्टनम्, अहिपुरं, भुजङ्गनगरं च नागौर-नगरस्य नामान्तराणि ।नागौर-नगरस्य सुन्दरतायाः वर्णनं कुर्वन् मोहम्मद हलीम सिद्दीकी इत्येषः अलिखत्, प्रत्येकेन दृष्टिकोणेन नागौर-नगरम् अत्यन्तं सुन्दरं नगरम् आसीत् । नागौर-नगरात् २ माइल दक्षिणपूर्वदिशः सौन्दर्यं नागौर-नगरस्य मुख्याकर्षणम् आसीत् । एतत् नगरम् परितः काश्चित् दीर्घा भित्तिका आसीत् । तस्याः भित्तिकायाः दैर्घ्यं ४ माइल् आसीत् । तस्याः भित्तिकायाः औन्नत्यं प्रदेशानुसारम् आसीत् । कुत्रचित् सा भित्तिका २.५ फीट्, अन्यत्र ५ फीट्, अपरत्र १७ फीट् च उन्नता आसीत् । नागौर-नगरस्य षट्द्वाराणि आसन् । तेषु द्वारेषु त्रीणि दक्षिणदिशायाम्, चतुर्थद्वारम् उत्तरदिशायां, पञ्चमद्वारं पश्चिमदिशायां, षष्ठमद्वारं पूर्वदिशायां च आसन् । एतानि षड्द्वाराणि क्रमेण अजयमेरुद्वारं, जोधपुरद्वारं, नखासद्वारं, भायाद्वारं, देहलीद्वारं च प्रसिद्धानि । नागौर-नगरे अनेके देवनागरीलिप्या, फारसी-लिप्या च लिखिताः शिलालेखाः प्राप्यन्ते । नागौर-नगरात् अनेकाः देवमूर्तयः प्राप्ताः । ताः मूर्तयः नागौर-नगरस्य मन्दिरेभ्यः, गृहेभ्यः, समाधिस्थलेभ्यः, यवनप्रार्थनागृहेभ्यः च प्राप्ताः ।

### भौगोलिकम्

नागौर-पत्तनं २७.२ उत्तराक्षांशे, ७३.७३ पूर्वदेशान्तरे च स्थितम् अस्ति । नागौरपत्तनस्य पूर्वदिशि जयपुरं, दक्षिणदिशि अजमेर-महानगरं, पाली-पत्तनं, जोधपुर-महानगरं च, पश्चिमदिशि जोधपुर-महानगरम्, उत्तरदिशि बीकानेर-नगरं, सीकरमण्डलं चास्ति ।

अहिच्छत्रपुरत्वेन नागौरबिजौलिया-शिलालेखे सूचना प्राप्यते यत्, अहिच्छत्रपुरस्य वत्सगोत्रे उत्पन्नः वासुदेवाख्यः (चौहानवंशीयः राजा) सामन्तः शाकम्भर्याः शासकः अभवत् । पृथ्वीराजविजयमहाकाव्ये वासुदेवस्य वर्णनं प्राप्यते यत्, एकदा सः आखेटाय वनम् अगच्छत् । तत्र विद्याधराख्येन गन्धर्वेण सह तस्य सम्पर्कः अभवत् । तस्य गन्धर्वस्य आशीर्वादेन वासुदेवः शाकम्भरीदेव्याः दर्शनं कर्तुं शक्तवान् । शाकम्भरीदेव्याः वरदानेन वासुदेवः लावणजलाशयं प्रापत् । यस्मिन् दिने वासुदे वः शाकम्भरीदेव्याः वरदानेन लावणजलाशयं प्रापत्, तस्यां रात्रौ शाकम्भरीदेव्याः मन्दिरे एव अशेत (शयनम् अकरोत्) । प्रातः यदा सः जागृतः, तदा सः शाकम्भरीदेव्याः दर्शनं कृत्वा राजधानीम् अगच्छत्। कर्नल् जेम्स् टॉड् इत्यस्य गुरुः यतिः ज्ञानचन्द्रः 'माण्डल मेवाड' इत्याख्ये सङ्ग्रहे पञ्चविंशतिदेशानां राजधानीनाम् उल्लेखम् अकरोत् । तस्यां सूचौ अपि जाङ्गलदेशस्य राजधानी अहिच्छत्रपुरं प्राप्यते । सन्धुदेशे अहिच्छत्रपुराख्यस्य नगरस्य अवस्थितिविषये भैरणमत्ति-शिलालेखेऽपि उल्लिखितम् अस्ति। इतिहासविदां मतानुसारं जाङ्गलप्रदेशस्य राजधानी अहिच्छत्रपुरम् आसीत् । परन्तु पृथ्वीराजविजयमहाकाव्ये जयानकःवासुदेवस्य राजधान्याः नाम नोल्लिखितवान् । अतः इतिहासवित्सु वैमनस्यम् अस्ति यत्, चौहानवंशीयानां राजधानी अहिच्छत्रपुरं कुत्र आसीत् ? इति । सम्पूर्णे भारतवर्षे अहिच्छत्रपुराख्याः अनेके ग्रामाः विद्यन्ते । 'बॉब्बे गेजेटियर्' मध्ये अनेकेषां ग्रामाणां नाम अहिच्छत्रपुरं प्राप्यते । अतः विवादः अधिकः उग्रः अभवत् । जनरल कनिंघम इत्यस्य इतिहासविदः मतानुसारम् अहिच्छत्रपुरम् उत्तरप्रदेशस्य रामनगरस्य पार्श्वे अस्ति ।

https://sa.wikipedia.org/wiki/नागौर